॥ दुर्गासूक्तम् ॥

॥ अथ दुर्गा सूक्तम् ॥
ॐ जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेदः।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं
दुरिताऽत्यग्निः ॥१॥
तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं
कर्मफलेषु जुष्टाम् । दुर्गां देविꣳ शरणमहं
प्रपद्ये सुतरसि तरसे नमः ॥ २॥
अग्ने त्वं पारया नव्यो अस्मान्थ्स्वस्तिभिरति
दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय
शंयोः ॥ ३॥
विश्वानि नो दुर्गहा जातवेदः सिन्धुन्न नावा
दुरिताऽतिपर्षि ।
अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता
तनूनाम् ॥ ४॥
पृतना जितꣳ सहमानमुग्रमग्निꣳ हुवेम
परमाथ्सधस्थात् ।
स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति
दुरितात्यग्निः ॥ ५॥
प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता
नव्यश्च सथ्सि ।
स्वाञ्चाग्ने तनुवं पिप्रयस्वास्मभ्यं च
सौभगमायजस्व ॥ ६॥
गोभिर्जुष्टमयुजो निषिक्तन्तवेन्द्र
विष्णोरनुसंचरेम ।नाकस्य पृष्ठमभि संवसानो
वैष्णवीं लोक इह मादयन्ताम् ॥ ७॥
ॐ कात्यायनाय विद्महे कन्यकुमारि धीमहि । तन्नो
दुर्गिः प्रचोदयात् ॥
॥ इति दुर्गा सूक्तम् ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

1

श्री दुर्गा देवी स्तोत्रं
ॐ ह्रीं दुर्गाये नमः
ॐ श्री दुर्गाकाली देव्याः नमः
उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका।
चण्डा चण्डवती चैव चामुण्डा चण्डिका तथा।।
आभिः शक्तिभिरष्टाभिः सततं परिवेष्टिताम्।
चिन्तयेत् सततं देवीं धर्मकामार्थमोक्षदाम्।।
ॐ अस्य श्री अभिषेक सूक्त महामन्त्रस्य दक्षिणामूर्तिः ऋषिः अनुष्टुप छन्दः श्रीपराशक्तिर्देवता सर्वसङ्कल्पसिद्धये
विनियोगः |
ॐ राजराजेश्वरी शक्तिर्भैरवी रुद्रभैरवी |
श्मशानभैरवी देवी त्रिमूर्त्यानन्दभैरवी ||
त्रिजटा त्रिपुटादेवी तथा त्रिपुरसुन्दरी |
त्रिपुरेशी महादेवी तथा त्रिपुरमालिनी ||
त्रिपुरानन्दिनी देवी तथैव त्रिपुराम्बिका |
एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||
ॐ छिन्नमस्ता महाविद्या तथैव च जटेश्वरी |
परा तारा जया दुर्गा शूलिनी भुवनेश्वरी ||
त्वरिताख्या महादेवी तथैव च त्रिखण्डिका |
नित्यानित्यस्वरूपा च वज्रप्रस्तारिणी तथा |
एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||
ॐ अश्वारूढा महादेवी तथा महिषमर्दिनी |
दुर्गा च नवदुर्गा च श्रीदुर्गा भगमालिनी ||
तथा भगोदरी देवी नित्यक्लिन्ना तथाऽपरा |
सर्वचक्रेश्वरी देवी तथा नीलसरस्वती ||
सर्वसिद्धिकरी देवी सिद्धगन्धर्वसेविता |
उग्रतारा महादेवी साक्षाच्छ्रीभद्रकालिका |
एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||
ॐ क्षेमङ्करी महामाया चानिरुद्धसरस्वती |
मातङ्गी चान्नपूर्णा च राजराजेश्वरी तथा |

2

एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||
ॐ उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका |
चण्डा चण्डवती चैव चण्डरूपातिचण्डिका |
एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||
ॐ उग्रदंष्ट्रा सुदंष्ट्रा च महादंष्ट्रकपालिनी
|
भीमनेत्रा विशालाक्षी मङ्गला विजया जया |
एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||
मङ्गला नन्दिनी भद्रा लक्ष्मीः
कान्तिर्यशस्विनी |
पुष्टिर्मेधा शिवा धात्री यशः शोभा जया धृतिः ||
श्रीनन्दा च सुनन्दा च नन्दिनी नन्दपूजिता |
एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||
ॐ विजया मङ्गला भद्रा धृतिः शान्तिः शिवा क्षमा |
सिद्धिस्तुष्टिरुमा पुष्टिः श्रद्धा चैव
रतिस्तथा ||
दीप्तिः कान्तिर्घना लक्ष्मीरीश्वरी बुद्धिरेव
च |
एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||
ॐ चक्री जयावती ब्राह्मी जयन्ती चापराजिता |
अजिता मानवी श्वेता अदितिश्चादिरेव च ||
माया चैव महामाया क्षोभिणी लोभिनी तथा |
कमला विमला गौरी शरण्या बुधसुन्दरी ||
दुर्गा क्रिया अरुन्धती च घण्टाहस्ता कपालिनी |
एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||
ॐ रौद्री काली च मायूरी त्रिनेत्रा चापराजिता |
सुरूपा च कुरूपा च तथैव विग्रहात्मिका ||
चर्चिका चापराज्ञेया तथैव सुरपूजिता |
एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||
ॐ वैवस्वती च कौमारी तथा माहेश्वरी परा |
वैष्णवी च महालक्ष्मीः कार्तिकी कौलिकी तथा ||
शिवदूती च चामुण्डा मुण्डमालाविभूषिता |

3

एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||
ॐ इन्द्रो अग्निश्च यमश्चैव निरृतिर्वरुणस्तथा |
पवनो धनदेशानौ ब्रह्मा अनन्तो दिगीश्वराः |
एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||
ॐ रविः सोमः कुजो सौम्यः गुरुः शुक्रः शनैश्चरः |
राहुः केतुश्च सततं अभिषिञ्चन्तु ते ग्रहाः ||
ॐ अस्तिताङ्गो रुरुश्चण्डः क्रोध
उन्मत्तसंज्ञकः |
कपाली भीषणाख्यश्च संहारश्चाष्टभैरवाः |
एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||
ॐ डाकिनीपुत्रकाश्चैव राकिणीपुत्रकास्तथा |
लाकिनीपुत्रकाश्चान्ये काकिनीपुत्रकाऽपरे ||
शाकिनीपुत्रका भूयो हाकिनीपुत्रकास्तथा |
ततश्च यक्षिणीपुत्राः देवीपुत्रास्ततः परम् ||
मातॄणां च तथा पुत्राः ऊर्ध्वमुख्याः सुताश्च ते
|
अधोमुख्याः सुताश्चैव कालमुख्याः सुताः परे |
एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||
ॐ ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः
|
एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||
ॐ पुरुषः प्रकृतिश्चैव विकाराश्चैव षोडश |
आत्माऽन्तरात्मा परमज्ञानात्मानः प्रकीर्तिताः
||
आत्मनश्च गुणाश्चैव स्थूला सूक्ष्माश्च ये परे |
एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||
ॐ वेदादिबीजं श्रीबीजं तथा तन्नीलकेतनं |
रमाबीजंमायाबीजं गुणाष्टकम् ||
चिन्तामणिर्महबीजं नारसिंहं च शाङ्करं |
मार्ताण्डभैरवं दौर्गं बीजं श्रीपुरुषोत्तमम् ||
गाणपत्यं च वाराहं कालबीजं भयापहं
एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||

4

ॐ गङ्गा गोदावरी रेवा यमुना च सरस्वती |
आत्रेयी भारती चैव सरयूर्गण्डकी तथा ||
करतोया चन्द्रभागा श्वेतगङ्गा च कौशिकी |
पाताले भोगवती चैव स्वर्गे मन्दाकिनी तथा |
एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||
ॐ भैरवो भीमरूपश्च शोणो घर्घर एव च |
सिन्धुश्चैव ह्रदश्चैव तथा पातालसम्भवाः |
एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||
ॐ यानि कानि च तीर्थानि पुण्यान्यायतनानि च |
तानि त्वामभिषिञ्चन्तु मन्त्रतन्त्रौषधानि च ||
ॐ जम्बूद्वीपादयो द्वीपाः सागरा लवणादयः |
अनन्ताद्यास्तथा नागाः सर्पाद्या तक्षकादयः |
एतस्त्वामभिषिञ्चन्तु मन्त्रपूतेन वारिणा ||
ॐ रतिश्च वल्लभावह्नेः वषट् कूर्चमतः परं
वौषट्कारस्तु फट्कारः अभिषिञ्चन्तु सर्वदा ||
ॐ नश्यन्तु प्रेतकूष्माण्डाः दानवा राक्षसाश्च
ये |
पिशाचा गुह्यका भूता अभिषेकेन ताडिताः ||
अलक्ष्मीः कालरात्रिश्च पापानि च महान्ति च |
नश्यन्तु चाभिषेकेन ताराबीजेन ताडिताः ||
रोगाः शोकाश्च दारिद्र्यं दौर्बल्यं दारुणं
महत् |
नश्यन्तु चाभिषेकेन वाग्बीजेनैव ताडिताः ||

नवार्ण मन्त्र विधि:
विनियोग:
ॐ अस्य श्रीनवार्णमन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः गायत्र्युष्णिगनुष्टुभश्छन्दासि, श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीत्यर्थे जपे विनियोगः।
न्यास:

5

१. ऋष्यादिन्यास:
ब्रम्हविष्णुरुद्रऋषिभ्यो नमः शिरसि।
गायत्र्युष्णिगनुष्टुभश्छन्दोभ्यो नमः मुखे।
श्रीमहाकालीमहालक्ष्मीमहासरस्वतीदेवताभ्यो नमः हृदि ।
ऐं बीजाय नमः गुह्ये ।
ह्रीं शक्तये नमः पादयो ।
क्लीं कीलकाय नमः नाभौ ।
ऐं ह्रीं क्लीं चामुण्डायै विच्चे:- इस मूल मन्त्र से हाथ धोकर करन्यास करें।
२. करन्यास:
ॐ ऐं अंगुष्ठाभ्यां नमः । (दोनों हाथों की तर्जनी अँगुलियों से अंगूठे के उद्गम स्थल को स्पर्श करें)
ॐ ह्रीं तर्जनीभ्यां नमः । (दोनों अंगूठों से तर्जनी अँगुलियों का स्पर्श करें)
ॐ क्लीं मध्यमाभ्यां नमः । (दोनों अंगूठों से मध्यमा अँगुलियों का स्पर्श करें)
ॐ चामुण्डायै अनामिकाभ्यां नमः । (दोनों अंगूठों से अनामिका अँगुलियों का स्पर्श करें) ॐ विच्चे कनिष्ठिकाभ्यां नमः । (दोनों अंगूठों से कनिष्ट/ अँगुलियों का स्पर्श करें)
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे करतलकरपृष्ठाभ्यां नमः । (हथेलियों और उनके पृष्ठ भाग का स्पर्श)
३. हृदयादिन्यास:
ॐ ऐं हृदयाय नमः । (दाहिने हाथ की पाँचों उँगलियों से ह्रदय का स्पर्श)
ॐ ह्रीं शिरसे स्वाहा । (शिर का स्पर्श)
ॐ क्लीं शिखायै वषट् । (शिखा का स्पर्श)
ॐ चामुण्डायै कवचाय हुम् । (दाहिने हाथ की अँगुलियों से बाएं कंधे एवं बाएं हाथ की

6

अँगुलियों से दायें कंधे का स्पर्श)
ॐ विच्चे नेत्रत्रयाय वौषट् । (दाहिने हाथ की उँगलियों के अग्रभाग से दोनों नेत्रों और मस्तक में भौंहों के मध्यभाग का स्पर्श)
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय फट । (यह मन्त्र पढ़कर दाहिने हाथ को सिर के ऊपर से बायीं ओर से पीछे ले जाकर दाहिनी ओर से आगे लाकर तर्जनी और मध्यमा अँगुलियों से बाएं हाथ की हथेली पर ताली बजाएं।
४. वर्णन्यास:
ॐ ऐं नमः शिखायाम् ।
ॐ ह्रीं नमः दक्षिणनेत्रे ।
ॐ क्लीं नमः वामनेत्रे ।
ॐ चां नमः दक्षिणकर्णे ।
ॐ मुं नमः वामकर्णे ।
ॐ डां नमः दक्षिणनासापुटे ।
ॐ यैं नमः वामनासापुटे ।
ॐ विं नमः मुखे ।
ॐ च्चें नमः गुह्ये ।
इस प्रकार न्यास करके मूलमंत्र से आठ बार व्यापक न्यास (दोनों हाथों से शिखा से लेकर पैर तक सभी अंगों का) स्पर्श करें।
अब प्रत्येक दिशा में चुटकी बजाते हुए निम्न मन्त्रों के साथ दिशान्यास करें:
५. दिशान्यास:
ॐ ऐं प्राच्यै नमः ।
ॐ ऐं आग्नेय्यै नमः ।
ॐ ह्रीं दक्षिणायै नमः ।
ॐ ह्रीं नैऋत्यै नमः ।
ॐ क्लीं प्रतीच्यै नमः ।
ॐ क्लीं वायव्यै नमः ।
ॐ चामुण्डायै उदीच्यै नमः ।

7

□ □□□□□□□□□□ □□□□□□□ □□□ □
□ □□ □□□□□ □□□□□ □□□□□□□□□□ □□□□□□ □□□□□□□□□
□□□ □
□ □□ □□□□□ □□□□□ □□□□□□□□□□ □□□□□□ □□□□□□ □□□ □
□. □□□□□□□□□□□□ :
**□□ □□□□□ □□ □□□□ □□ □□□□ □□ □□□□ □□□□□□ □□
□□□□ □□**
□ □□ □□□□□ □□□□□ □□□ □□□□□□□□□□□□□□□□□ □□□ □
□ □□ □□□□□ □□□□□ □□□ □□□□□□□□□□□□□□□ □□□ □
□ □□ □□□□□ □□□□□ □□□ □□□□□□□□□□□□□ □□□ □
□ □□ □□□□□ □□□□□ □□□ □□□□□□□□□□□□ □□□ □
□ □□ □□□□□ □□□□□ □□□ □□□□□□□□□□□□ □□□ □
□ □□ □□□□□ □□□□□ □□□ □□□□□□□□□□□□□ □□□ □
□ □□ □□□□□ □□□□□ □□□ □□□□□□ □□□□□□ □
□ □□ □□□□□ □□□□□ □□□ □□□□□□ □□□□□ □
□ □□ □□□□□ □□□□□ □□□ □□□□□ □□□□□ □
□ □□ □□□□□ □□□□□ □□□ □□□□□□□□□□□ □□□□□□ □
□ □□ □□□□□ □□□□□ □□□ □□□□□□□□□ □□ □
□. □□□□□□□□□□□□□□ :
□□□□□ □□□□□□□□□ □□□□□□□□ □□□ □□□□ □
□□□□□ □□□□□□□□□□ □□□□□□□□□ □□□ □□□□ □
□□□□□ □□□□□□□ □□□□□□□□ □□□ □□□□ □
□□□□□ □□□□□□□□ □□□□□□□□ □□□ □□□□ □
□□□□□ □□□□□□□ □□□□□□□□ □□□ □□□□ □
□□□□□ □□□□□□□□□□ □□□□□□□□ □□□ □□□□ □
□□□□□ □□□□□□□□□ □□□□□□□ □□□ □□□□ □
□□□□□ □□□□□□□□□□□□□□ □□□□□□□□ □□□ □□□□ □
□□□□□ □□□□□□□□□□□□ □□□□□□□ □□□ □□□□ □
□□□□□ □□□□□□□□□□□□□□□□□ □□□□□ □□□ □□□□ □
□□□□□ □□□□□□□□□□ □□□□□□ □□□ □□□□ □

८. षड्देविन्यास
कमलाकुशमण्डिता नंदजा पूर्वांग मे पातु ।
खडगपात्रकरा रक्तदन्तिका दक्षिणाङ्ग मे पातु ।
पुष्पपल्लवसंयुता शाकम्भरी प्रष्ठांग मे पातु ।
धनुर्वाणकरा दुर्गा वामांग मे पातु ।
शिरःपात्रकराभीमा मस्तकादि चरणान्तं मे पातु ।
चित्रकान्तिभूत भ्रामरी पादादि मस्तकान्तम् मे पातु ।
९. ब्रह्मादिन्यास
ॐ सनातनः ब्रह्मा पाददीनाभिपर्यन्त मा पातु ।
ॐ जनार्दनः नाभिर्विशुद्धिपर्यन्तं मा पातु ।
ॐ रुद्रस्त्रिलोचनः विशुद्धेर्ब्रह्मरन्ध्रांतं मा पातु ।
ॐ हंसः पदद्वयं मा पातु ।
ॐ वैनतेयः करद्वयं मा पातु ।
ॐ वृषभः चक्षुषी मा पातु ।
ॐ गजाननः सर्वाङ्गानि मा पातु ।
ॐ आनंदमयो हरिः परापरौ देहभागौ मा पातु ।
१०. महालक्ष्मयादिन्यास:
ॐ अष्टादशभुजान्विता महालक्ष्मी मध्यं मे पातु ।
ॐ अष्टभुजोर्विता सरस्वती उर्ध्वे मे पातु ।
ॐ दशभुजसमन्विता महाकाली अधः मे पातु ।
ॐ सिंहो हस्त द्वयं मे पातु ।
ॐ परंहंसो अक्षियुग्मं मे पातु ।
ॐ दिव्यं महिषमारूढो यमः पादयुग्मं मे पातु ।
ॐ चण्डिकायुक्तो महेशः सर्वाङ्गानी मे पातु ।
११. बीजमन्त्रन्यास:
ॐ ऐं हृदयाय नमः । (दाहिने हाथ की पाँचों उँगलियों से ह्रदय का स्पर्श)
ॐ ह्रीं शिरसे स्वाहा ।(शिर का स्पर्श)
ॐ क्लीं शिखायै वषट् । (शिखा का स्पर्श)
ॐ चामुण्डायै कवचाय हुम् । (दाहिने हाथ की

9

अँगुलियों से बाएं कंधे एवं बाएं हाथ की अँगुलियों से दायें कंधे का स्पर्श)
ॐ विच्चे नेत्रत्रयाय वौषट् । (दाहिने हाथ की उँगलियों के अग्रभाग से दोनों नेत्रों और मस्तक में भौंहों के मध्यभाग का स्पर्श)
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय फट । (यह मन्त्र पढ़कर दाहिने हाथ को सिर के ऊपर से बायीं ओर से पीछे ले जाकर दाहिनी ओर से आगे लाकर तर्जनी और मध्यमा अँगुलियों से बाएं हाथ की हथेली पर ताली बजाएं।
१२. विलोमबीजन्यास:
ॐ च्चें नमः गुह्ये ।
ॐ विं नमः मुखे ।
ॐ यैं नमः वामनासापुटे ।
ॐ डां नमः दक्षिणनासापुटे ।
ॐ मुं नमः वामकर्णे ।
ॐ चां नमः दक्षिणकर्णे ।
ॐ क्लीं नमः वामनेत्रे ।
ॐ ह्रीं नमः दक्षिणनेत्रे ।
ॐ ऐं नमः शिखायाम् ।
१३. मन्त्रव्याप्तिन्यास:
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे मस्तकाचरणान्तं पूर्वाङ्गे (आठ बार) ।
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे पादाच्छिरोंतम दक्षिणाङ्गे (आठ बार) ।
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे पृष्ठे (आठ बार) ।
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे वामांगे (आठ बार) ।
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे मस्तकाच्चरणात्नं (आठ बार) ।
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे

10

चरणात्मस्तकावधि (आठ बार) ।
।। ध्यानम् ।। ॐ खड्गं चक्रगदेषुचाप परिधाञ्छूलं भुशुण्डीं शिरः, शङ्खं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् । नीलाश्मद्युतिमास्य पाददशकां सेवे महाकालिकाम्, यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम् ।। १।। ॐ अक्षस्रक्परशुं गदेषुकुलिशं पद्मं धनुष्कुण्डिकां, दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् । शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननां सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ।। २।। घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकं हस्ताब्जैर्दशतीं
घनान्तविलसच्छितांशुतुल्य प्रभाम् ।।
गौरीदेहसमुद्भुवां त्रिजगतामाधारभूतां
महापूर्वामत्र सरस्वतीमनुभजे
शुम्भादिदैत्यार्दिनीम् ।। ३।। ।। माला-पूजन ।।
माला के गन्धाक्षत करें तथा “ऐं ह्रीं अक्षमालिकायै नमः” इस मंत्र से पूजा करके प्रार्थना करें – ॐ मां माले महामाये सर्वशक्ति स्वरुपिणि । चतुर्वर्गस्त्वयि न्यस्तः तस्मान्मे सिद्धिदाभव ।। ॐ अविघ्नं कुरुमाले त्वं गृह्णामि दक्षिणे करे । जपकाले च सिद्धयर्थं प्रसीद मम सिद्धये ।। ॐ अक्षमालाधिपतये सुसिद्धिं देहि देहि सर्व मंत्रार्थ साधिनि साधय साधय सर्वसिद्धिं परिकल्पय परिकल्पय मे स्वाहा । इसके बाद “ऐ ह्रीं क्लीं चामुण्डायै विच्चे” इस मंत्र का १०८ बार जप करें । ।। पाठ-समर्पण ।। ॐ गुह्याति-गुह्य-गोप्त्री त्वं, गृहाणास्मत्-कृतं जपम् । सिद्धिर्मे भवतु देवि! त्वत्- प्रसादान्महेश्वरि! ।। उक्त श्लोक पढ़कर देवी के वाम हस्त में जप निवेदन करें ।

11

गुप्त-सप्तशती
॥सिद्धकुञ्जिकास्तोत्रम्॥ शिव उवाच शृणु देवि प्रवक्ष्यामि, कुञ्जिकास्तोत्रमुत्तमम्। येन मन्त्रप्रभावेण चण्डीजापः शुभो भवेत॥१॥ न कवचं नार्गलास्तोत्रं कीलकं न रहस्यकम्। न सूक्तं नापि ध्यानं च न न्यासो न च वार्चनम्॥२॥
कुञ्जिकापाठमात्रेण दुर्गापाठफलं लभेत्। अति गुह्यतरं देवि देवानामपि दुर्लभम्॥३॥ गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति। मारणं मोहनं वश्यं स्तम्भनोच्चाटनादिकम्। पाठमात्रेण संसिद्ध्येत् कुञ्जिकास्तोत्रमुत्तमम्॥४॥ ॥अथ मन्त्रः॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे॥ ॐ ग्लौं हुं क्लीं जूं सः ज्वालय ज्वालय ज्वल ज्वल प्रज्वल प्रज्वल ऐं ह्रीं क्लीं चामुण्डायै विच्चे ज्वल हं सं लं क्षं फट् स्वाहा॥ ॥इति मन्त्रः॥ नमस्ते रूद्ररूपिण्यै नमस्ते मधुमर्दिनि। नमः कैटभहारिण्यै नमस्ते महिषार्दिनि॥१॥ नमस्ते शुम्भहन्त्र्यै च निशुम्भासुरघातिनि। जाग्रतं हि महादेवि जपं सिद्धं कुरूष्व मे॥२॥ ऐंकारी सृष्टिरूपायै ह्रींकारी प्रतिपालिका। क्लींकारी कामरूपिण्यै बीजरूपे नमोऽस्तु ते॥३॥ चामुण्डा चण्डघाती च यैकारी वरदायिनी। विच्चे चाभयदा नित्यं नमस्ते मन्त्ररूपिणि॥४॥ धां धीं धूं धूर्जटेः पत्नी वां वीं वूं वागधीश्वारी। क्रां क्रीं क्रूं कालिका देवि शां शीं शूं मे शुभं कुरु॥५॥ हुं हुं हुंकाररूपिण्यै जं जं जं जम्भनादिनी। भ्रां भ्रीं भ्रूं भैरवी भद्रे भवान्यै ते नमो नमः॥६॥
अं कं चं टं तं पं यं शं वीं दुं ऐं वीं हं क्षं। धिजाग्रं धिजाग्रं त्रोटय त्रोटय दीप्तं कुरु कुरु स्वाहा॥७॥ पां पीं पूं पार्वती पूर्णा खां खीं खूं खेचरी तथा। सां सीं सूं सप्तशती देव्या

12

मन्त्रसिद्धिं कुरुष्व मे॥८॥ इदं तु कुञ्जिकास्तोत्रं मन्त्रजागर्तिहेतवे। अभक्ते नैव दातव्यं गोपितं रक्ष पार्वति॥ यस्तु कुञ्जिकाया देवि हीनां सप्तशतीं पठेत्। न तस्य जायते सिद्धिररण्ये रोदनं यथा॥ इति श्रीरुद्रयामले गौरीतन्त्रे शिवपार्वतीसंवादे कुञ्जिकास्तोत्रं सम्पूर्णम् ॥
॥ गुप्त-सप्तशती ॥ ॐ ब्रीं-ब्रीं-ब्रीं वेणु- हस्ते, स्तुत-सुर-बटुकैर्हां गणेशस्य माता। स्वानन्दे नन्द-रुपे, अनहत-निरते, मुक्तिदे मुक्ति-मार्गे॥ हंसः सोहं विशाले, वलय-गति-हसे, सिद्ध-देवी समस्ता। हीं-हीं-हीं सिद्ध-लोके, कच-रुचि-विपुले, वीर-भद्रे नमस्ते॥१॥ ॐ हींकारोच्चारयन्ती, मम हरति भयं, चण्ड-मुण्डौ प्रचण्डे। खां-खां-खां खड्ग-पाणे, ध्रक-ध्रक ध्रकिते, उग्र-रुपे स्वरुपे॥ हुँ-हुँ हुँकांर-नादे, गगन-भुवि-तले, व्यापिनी व्योम-रुपे। हं-हं हंकार-नादे, सुर-गण-नमिते, चण्ड-रुपे नमस्ते॥२॥
ऐं लोके कीर्तयन्ती, मम हरतु भयं, राक्षसान् हन्यमाने। घ्रां-घ्रां-घ्रां घोर-रुपे, घघ-घघ-घटिते, घर्घरे घोर-रावे ॥ निर्मांसे काक-जंघे, घसित-नख-नखा, धूम्र-नेत्रे त्रि-नेत्रे। हस्ताब्जे शूल-मुण्डे, कुल-कुल ककुले, सिद्ध-हस्ते नमस्ते॥३॥ ॐ क्रीं-क्रीं-क्रीं ऐं कुमारी, कुह-कुह-मखिले, कोकिलेनानुरागे। मुद्रा-संज्ञ-त्रि-रेखा, कुरु-कुरु सततं, श्री महा-मारि गुह्ये॥ तेजांगे सिद्धि-नाथे, मन-पवन-चले, नैव आज्ञा-निधाने। ऐंकारे रात्रि-मध्ये, स्वपित-पशु- जने, तत्र कान्ते नमस्ते॥४॥ ॐ व्रां-व्रीं-व्रूं व्रैं कवित्वे, दहन-पुर-गते रुक्मि-रुपेण चक्रे। त्रिः-शक्तया, युक्त-वर्णादिक, कर-नमिते, दादिवं पूर्व-वर्णे॥ ह्रीं-स्थाने काम-राजे, ज्वल-ज्वल

13

ज्वलिते, कोशिनि कोश-पत्रे। स्वच्छन्दे कष्ट-नाशे, सुर-वर-वपुषे, गुह्य-मुण्डे नमस्ते॥५॥ ॐ घ्रां-घ्रीं-घ्रूं घोर-तुण्डे, घघ-घघ घघघे घर्घरान्याङि्घ्र-घोषे। ह्रीं क्रीं द्रूं द्रोञ्च-चक्रे, रर-रर-रमिते, सर्व-ज्ञाने प्रधाने॥ द्रीं तीर्थेषु च ज्येष्ठे, जुग-जुग जजुगे म्लीं पदे काल-मुण्डे। सर्वांगे रक्त-धारा-मथन-कर-वरे, वज्र-दण्डे नमस्ते॥६॥ ॐ क्रां क्रीं क्रूं वाम-नमिते, गगन गड-गडे गुह्य-योनि- स्वरुपे। वज्रांगे, वज्र-हस्ते, सुर-पति-वरदे, मत्त-मातंग-रुढे॥ स्वस्तेजे, शुद्ध-देहे, लल-लल-ललिते, छेदिते पाश-जाले। किण्डल्याकार-रुपे, वृष वृषभ-ध्वजे, ऐन्द्रि मातर्नमस्ते॥७॥ ॐ हुँ हुँ हुंकार-नादे, विषमवश-करे, यक्ष-वैताल-नाथे। सु- सिद्धयर्थे सु-सिद्धैः, ठठ-ठठ-ठठठः, सर्व-भक्षे प्रचण्डे॥ जूं सः सौं शान्ति-कर्मेऽमृत-मृत-हरे, निःसमेसं समुद्रे। देवि, त्वं साधकानां, भव-भव वरदे, भद्र-काली नमस्ते॥८॥ ब्रह्माणी वैष्णवी त्वं, त्वमसि बहुचरा, त्वं वराह-स्वरुपा। त्वं ऐन्द्री त्वं कुबेरी, त्वमसि च जननी, त्वं कुमारी महेन्द्री॥ ऐं ह्रीं क्लींकार-भूते, वितल-तल-तले, भू-तले स्वर्ग-मार्गे। पाताले शैल-श्रृंगे, हरि- हर-भुवने, सिद्ध-चण्डी नमस्ते॥९॥ हं लं क्षं शौण्डि-रुपे, शमित भव-भये, सर्व-विघ्नान्त-विघ्ने। गां गीं गूं गैं षडंगे, गगन-गति-गते, सिद्धिदे सिद्ध-साध्ये॥ वं क्रं मुद्रा हिमांशोर्प्रहसति-वदने, त्र्यक्षरे ह्सैं निनादे। हां हूं गां गीं गणेशी, गज-मुख-जननी,
त्वां महेशीं नमामि॥१०॥
॥ स्तवन ॥ या देवी खड्ग-हस्ता, सकल-जन-पदा,
व्यापिनी विशऽव-दुर्गा। श्यामांगी शुक्ल-पाशाब्दि जगण-गणिता, ब्रह्म-देहार्ध-वासा॥

14

ज्ञानानां साधयन्ती, तिमिर-विरहिता, ज्ञान-दिव्य-प्रबोधा। सा देवी, दिव्य-मूर्तिर्प्रदहतु दुरितं, मुण्ड-चण्डे प्रचण्डे॥१॥ ॐ हां हीं हूं वर्म-युक्ते, शव-गमन-गतिर्भीषणे भीम-वक्त्रे। क्रां क्रीं क्रूं क्रोध-मूर्तिर्विकृत-स्तन-मुखे, रौद्र-दंष्ट्रा-कराले॥ कं कं कंकाल-धारी भ्रमप्ति, जगदिदं भक्षयन्ती ग्रसन्ती- हुंकारोच्चारयन्ती प्रदहतु दुरितं, मुण्ड-चण्डे प्रचण्डे॥२॥ ॐ ह्रां ह्रीं हूं रुद्र-रुपे, त्रिभुवन-नमिते, पाश-हस्ते त्रि-नेत्रे। रां रीं रुं रंगे किले किलित रवा, शूल-हस्ते प्रचण्डे॥
लां लीं लूं लम्ब-जिह्वे हसति, कह-कहा शुद्ध-घोराट्ट-हासैः। कंकाली काल-रात्रिः प्रदहतु दुरितं, मुण्ड-चण्डे प्रचण्डे॥३॥ ॐ घ्रां घ्रीं घ्रूं घोर-रुपे घघ-घघ-घटिते घर्घराराव घोरे। निमाँसे शुष्क-जंघे पिबति नर-वसा धूम्र-धूम्रायमाने॥ ॐ द्रां द्रीं द्रूं द्रावयन्ती, सकल-भुवि-तले, यक्ष-गन्धर्व-नागान्। क्षां क्षीं क्षूं क्षोभयन्ती प्रदहतु दुरितं चण्ड-मुण्डे प्रचण्डे॥४॥ ॐ भ्रां भ्रीं भ्रूं भद्र-काली, हरि-हर-नमिते, रुद्र-मूर्ते विकर्णे। चन्द्रादित्यौ च कर्णौ, शशि-मुकुट-शिरो वेष्ठितां केतु-मालाम्॥ स्त्रक्-सर्व-चोरगेन्द्रा शशि-करण-निभा तारकाः हार-कण्ठे। सा देवी दिव्य-मूर्तिः, प्रदहतु दुरितं चण्ड-मुण्डे प्रचण्डे॥५॥ ॐ खं-खं-खं खड्ग-हस्ते, वर-कनक-निभे सूर्य-कान्ति-स्वतेजा। विद्युज्ज्वालावलीनां, भव-निशित महा-कर्त्रिका दक्षिणेन॥ वामे हस्ते कपालं, वर-विमल-सुरा-पूरितं धारयन्ती। सा देवी दिव्य-मूर्तिः प्रदहतु दुरितं चण्ड-मुण्डे प्रचण्डे॥६॥ ॐ हुँ हुँ फट् काल-रात्रीं पुर-सुर-मथनीं धूम्र-मारी कुमारी। ह्रां ह्रीं ह्रूं

15

हन्ति दुष्टान् कलित किल-किला शब्द अट्टाट्टहासे॥ हा-हा भूत-प्रभूते, किल-किलित-मुखा, कीलयन्ती ग्रसन्ती। हुंकारोच्चारयन्ती प्रदहतु दुरितं चण्ड-मुण्डे प्रचण्डे॥७॥ ॐ ह्रीं श्रीं क्रीं कपालीं परिजन-सहिता चण्डि चामुण्डा-नित्ये। रं-रं रंकार-शब्दे शशि-कर-धवले काल-कूटे दुरन्ते॥ हुँ हुँ हुंकार-कारि सुर-गण-नमिते, काल-कारी विकारी। त्र्यैलोक्यं वश्य-कारी, प्रदहतु दुरितं चण्ड-मुण्डे प्रचण्डे॥८॥
वन्दे दण्ड-प्रचण्डा डमरु-डिमि-डिमा, घण्ट टंकार-नादे। नृत्यन्ती ताण्डवैषा थथ-थइ विभवैर्निर्मला मन्त्र-माला॥ रुक्षौ कुक्षौ वहन्ती, खर-खरिता रवा चार्चिनि प्रेत-माला। उच्चैस्तैश्चाट्टहासै, हह हसित रवा, चर्म-मुण्डा प्रचण्डे॥९॥ ॐ त्वं ब्राह्मी त्वं च रौद्री स च शिखि-गमना त्वं च देवी कुमारी। त्वं चक्री चक्र-हासा घुर-घुरित रवा, त्वं वराह-स्वरुपा॥ रौद्रे त्वं चर्म-मुण्डा सकल-भुवि-तले संस्थिते स्वर्ग-मार्गे। पाताले शैल-श्रृंगे हरि-हर-नमिते देवि चण्डी नमस्ते॥१०॥ रक्ष त्वं मुण्ड-धारी गिरि- गुह-विवरे निर्झरे पर्वते वा। संग्रामे शत्रु- मध्ये विश विषम-विषे संकटे कुत्सिते वा॥
व्याघ्रे चौरे च सर्पेऽप्युदधि-भुवि-तले वह्नि- मध्ये च दुर्गे। रक्षेत् सा दिव्य-मूर्तिः
प्रदहतु दुरितं मुण्ड-चण्डे प्रचण्डे॥११॥
इत्येवं बीज-मन्त्रैः स्तवनमति-शिवं पातक-व्याधि-नाशनम्। प्रत्यक्षं दिव्य-रुपं ग्रह-गण-मथनं मर्दनं शाकिनीनाम्॥ इत्येवं वेद-वेद्यं सकल-भय-हरं मन्त्र-शक्तिश्च नित्यम्। मन्त्राणां स्तोत्रकं यः पठति स लभते प्रार्थितां मन्त्र-सिद्धिम्॥१२॥ चं-चं-चं चन्द्र-हासा चचम चम-चमा चातुरी चित्त-केशी। यं-

16

यं-यं योग-माया जननि जग-हिता योगिनी योग-रुपा॥ डं- डं-डं डाकिनीनां डमरुक-सहिता दोल हिण्डोल डिम्भा। रं-रं-रं रक्त-वस्त्रा सरसिज-नयना पातु मां देवि दुर्गा॥१३॥

श्रीलघुस्तोत्रम् (पञ्चस्तवि)
आधारे तरुणार्कबिम्बरूचिरं सोमप्रभं वाग्भवं बीजं मनमथमिंद्रगोपकनिभं ह्रत्पंकजे संस्थितम् ।
रन्ध्रे ब्रह्मपदे च शाक्तमपरं चन्द्रप्रभाभासुरं ये ध्यायंति पदत्रयं तव शिवे ते यांति सौख्यं पदम्
ॐ अस्य श्रीलघुस्तोत्रस्य वृद्धसारस्वतऋषि: । त्रिपुराभैरवी देवता । शार्दूलविक्रीडितं छंद: । मम सर्वकामफलप्राप्त्र्थे जपे विनियोग: ।
ॐ ऐन्द्रस्येव शरासनस्य दधतो मध्ये ललाटप्रभां शौक्लीं कान्तिमनुष्य गोरिव शिरस्यातन्वती सर्वत: ।
एषाऽसौ त्रिपुरा ह्रदि द्युतिरिवोष्मांशो: सदा संस्थिता छिद्यान्न: सहसा पदैस्त्रिभिरघं ज्योतिर्मयी वांगमयी ।।1।।
या मात्रा
त्रिपुषोलतातनुलसत्तंतुसिथतिस्पर्धिनी वाग्बीजे प्रथमे स्थिता तव सदा तां मन्महे ते वयम् ।
शक्ति कुण्डलिनीति विश्वजननव्यापारबद्धोद्यमां ज्ञात्वेत्थं न पुन: स्प्रशंति जननीगर्भेर्भकत्वं नरा: ।।2।।
दृष्ट्वा संभ्रमकारि वस्तु सहसा ऐं ऐमिति व्याह्रतं येनाकूतवशादपीह वरदे बिंदु बिनाप्यक्षरम् ।

17

तस्यापि ध्रुवमेव देवितरसा जाते तवानुग्रहे वाच: सूक्तिसुधारसद्रवमुचो निर्यान्ति वक्त्रोदरात् ।।3।।
यन्नित्ये तव कामराजमपरं मन्त्राक्षरं निष्कलं तत्सारस्वतमित्यवैति विरल: कश्र्चिद्बुधश्रेचद्भुवि ।
आख्यां प्रतिपर्व सत्यतपसो यत्कीर्तयन्तो
द्विजा: प्रारम्भे प्रणवास्पदं प्रणयितुं नित्योंच्चरंति स्फुटम् ।।4।।
यत्सदयो वचसां प्रव्रत्तिकरणे दृष्टप्रभावं बुधैस्तार्तीयं तदहं नमामि मनसा तद्वीजमिंदुप्रभम् ।
अस्त्वौर्वोऽपि सरस्वतीमनुगते
जाड्यांबुविच्छित्तये गोशब्दो गिरिवर्तते सुनियतं योगं विना सिद्धित: ।।5।।
एकैकं तव देवि जन्म हयनघं सव्यंजनाव्यंजनं कूटस्थं यदि वा प्रथक क्रमगतं यद्वा स्थितं व्युत्क्रमात् ।
यं यं काममपेक्ष्य येन विधिना केनापि वा
चिन्तितं जप्तं वा सफलीकरोति तरसा तं तं समस्तं न्रणाम् ।।6।।
वामे पुस्तकधारिणीमभयदां साक्षस्त्रजं दक्षिणे भक्तेभ्या वरदानपेशलकरां कर्पूरकंदोज्ज्वलाम् ।
उज्ज्रम्भाम्बुजपत्रकान्तिनयनां
स्त्रिग्धप्रभालोकिनीं ये त्वामंब न शीलयन्ति मनसा तेषां कवित्वं कुत: ।।7।।
ये त्वां पांडुरपुण्डरीकपटलस्पष्टाभिरामप्रभां सिंचंतीममृतद्रवैरिव शिरो ध्यायंति मूर्धि्न स्थिताम् ।

18

अश्रातं विकटं स्फ्टाक्षरपदा निर्यान्ति वक्त्राम्बुजात्तेषां भारति भारती सुरसरित्कल्लोललोलोर्मय: ।।8।।
ये सिंदूरपरागपुंजपिहितां त्वत्तेजसा द्यामिमामुर्वीं चापि विलीनयावकरसप्रस्तारमगनामिव ।
पश्यन्ति
क्षणमप्यनन्यमनसस्तेषामनंगज्वरक्लांता
स्त्रस्तकुरंगदारकद्रशो वश्या भवानी ध्रुवम् ।।
9।।
चंचत्कांचनकुण्डलांगदधरामाबद्धकांचिस्रजं ये त्वां चेतसि तदनतेक्षणमपि ध्यायन्ति कृत्वा स्थिराम् ।
तेषां वेश्मसु विभ्रमादहरह:कारीभवंत्यश्र्चिरं
माद्यत्कुंजकर्णतालतरला: स्थैर्यं भजंति श्रिय: ।।10।।
आर्भक्याशशिखण्डमण्डित जटाजूटां न्रमुंडस्त्रजं बंधूकप्रसवारुणांबरधरां प्रेतासनाध्यासिनीम् ।
त्वां ध्यायंति चतुर्भुजां
त्रिनयनामापीनतुंगस्तनीं मध्ये
निम्नवलित्रयांकिततनुं त्वद्रूपकं चिन्तये ।।
11।।
जातोऽप्यल्पहरिच्छिदे क्षितिभुजां सामान्यमात्रे कुले नि:शेषावनिचक्रवर्तिपदवीं लब्धवा प्रतापोन्नत: ।
यद्विद्याधरवृन्दवन्दितपद:
श्रीवत्सराजोभवद्देवि त्वंचरणांबुजप्रणतित: सोऽयं प्रसादोदय: ।।12।।
चण्डी त्वंचरणाम्बुजार्चनकृते बिल्वीदलोल्लुण्ठनात् त्रुट्यत्कंटककोटिभि: परिचयं येषां न जग्मु: करा: ।

19

ते
दंडाकुशचक्रचापकुलिशश्रीवत्सवत्सांकितेर्जायन्ते पृथिवीभुज: कथमिवाम्भोजप्रभै: पाणिभि: ।।
13।।
विप्रा: क्षोणिभुजो विशस्तदितरे क्षीराज्यमध्वासवैस्त्वां देवि त्रिपुरे परां परकलां संतर्प्य पूजाविधौ ।
यां यां प्रार्थयते मन: स्थिरधियां येषां त एव
ध्रुवं तां तां सिद्धि मवापनुवन्ति तरसा विघ्नैरविघ्नीकृता: ।।14।।
शब्दानां जननि त्वमत्र भुवने वाग्वादिनोत्युच्यसे त्वत्त केशववासवप्रभृतयोप्याविर्भवन्ति ध्रुवम् ।
लीयन्ते खलु यत्र कल्पवरिमे
ब्रह्मादयस्तेऽप्यमी सा त्वं काचिदचिन्त्यरूपगहना शक्ति: परा गीयसे ।।15।।
देवानां त्रितयं त्रयीहुतभुजां शक्तित्रयं त्रिस्वरास्त्रैलोक्यं त्रिपदी त्रिपुष्करमथो त्रिर्ब्रह्मकर्णास्त्रय: ।
यत्किंचिंज्जगति त्रिधा नियमितं वस्तु
त्रिवर्गादिकं तत्सर्व त्रिपुरेति नाम भगवत्यन्वेति ते सत्तवत: ।।16।।
लक्ष्मीं राजकुले जयं रणमुखे क्षेमकंरीमध्वनि क्रव्यादद्विपसर्पभाजि शबरीकांतारदुर्गे गिरौ ।
भूतप्रेतपिशाचज्रम्भकभयं स्मृत्वा महाभैरवीं
व्यामोहे त्रिपुरां तरन्ति विपदस्तारांचतां यत्प्लवे ।।17।।
या या कुण्डलिनी क्रिया मधुमती काली कलामालिनी मातंगी विजया जया भगवती देवी शिवा शाम्भवी ।

20

शक्ति शंकरवल्लभा त्रिनयना वाग्वादिनी भैरवी ह्रींकारी त्रिपुरा परापरमयी माता कुमारीत्यसि ।।18।।
आईपल्लवितै:
परस्परयुतैर्द्वित्रिक्रमाद्यक्षरै: काद्यै: क्षान्तगतै: स्वरादिभिरथ क्षांतैश्र्च तै: सस्वरै: ।
नामानि त्रिपुरे भवन्ति खलु या नित्यं तु गुह्यानि ते तेभ्यो भैरवपत्नि विंशतिसहस्त्रेभ्य: परेभ्यो नम: ।।19।।
बोद्धव्या निपुणं बुधै: स्तुतिरियं कृत्वा मनस्तदन्तं भारत्यास्त्रिपुरेत्यनन्यमनसा यत्राद्यवृत्ति: स्फुटम् ।
एकद्वित्रिपदक्रमेण
कथितस्तत्पादसंख्याक्षरैर्मन्त्रोद्धारविधिर् विशेषसहित: सत्संप्रदायान्वित: ।।20।।
सावद्यं निरवद्यमस्तु यदि वा किंवाऽनया चिन्तया नूनं स्तोत्रमिदं पठिष्यति जनो यस्यास्ति भक्तिस्त्वयि ।
संचिन्त्यापि लघुत्वमात्मनि दृढ संजायमानं
हठात्वद्भक्त्या मुखरीकृतेन रचितं यत्स्यान्मयाऽपि ध्रुवम् ।।21।।
आनन्दोद्भवकम्पघूर्णंनयनं निद्राट्टहासादिकं वेदव्याकरणावगाहकवितातर्कोक्तिमुक्तिप्रदम् ।
वश्याकर्षपुरप्रवेशनगरक्षोभादिसिद्धयष्टकं
लघ्वाचार्य इदं करोति सततं सौभाग्यमारोग्यताम्
।।22।।
गौरि त्र्म्बकपत्नि पार्वति सति त्रैलोक्यगाने शिवे शर्वाणि त्रिपुरे भवानि वरदे रुद्राणि
कात्यायनि ।
भीमे-भैरवि चण्डिसर्ववरदेकालेक्षये शूलिनि
त्वत्पादप्रणतं।।

21

श्रीकालिकाष्टकम्
॥ ध्यानं ॥
गलद् रक्तमण्डावलीकण्ठमाला महाघोररावा सुदंष्ट्रा कराला । विवस्त्रा श्मशानलया मुक्तकेशी महाकालकामाकुला कालिकेयम् ॥१॥ भजे
वामयुग्मे शिरोस्सिं दधाना वरं दक्षयुग्मेस्भयं
वै तथैव । सुमध्यास्पि तुङ्गस्तनाभारनम्रा लसद्
रक्तसृक्कद्वया सुस्मितास्या ॥२॥
शवद्वन्द्वकर्णावतंसा सुकेशी लसत्प्रेतपाणिं
प्रयुक्तैककाञ्ची । शवाकारमञ्चाधिरूढा
शिवाभिश्चतुर्दिक्षशब्दायमानास्भिरेजे ॥३॥
स्तुति: विरञ्च्यादिदेवास्त्रयस्ते गुणांस्त्रीन् समाराध्य कालीं प्रधाना बभूवु: । अनादिं सुरादिं मखादिं भवादिं स्वरूपं त्वदीयं न विन्दन्ति देवा: ॥४॥ जगन्मोहनीयं तु वाग्वादिनीयं सुहृत्पोषिणीशत्रुसंहारणीयम् । वचस्तम्भनीयं किमुच्चाटनीयं स्वरूपं त्वदीयं न विन्दन्ति देवा: ॥५॥ इयं स्वर्गदात्री पुन: कल्पवल्ली मनोजांस्तु कामान् यथार्थं प्रकुर्यात् । तथा ते कृतार्था भवन्तीति नित्यं
स्वरूपं त्वदीयं न विन्दन्ति देवा: ॥६॥
सुरापानमत्ता सभुक्तानुरक्ता लसत्पूतचित्ते
सदाविर्भवत्ते । जपध्यानपूजासुधाधौतपङ्का
स्वरूपं त्वदीयं न विन्दन्ति देवा: ॥७॥
चिदान्दकन्दं हसन् मन्दमन्दं शरच्चन्द्रकोटिप्रभापुञ्जबिम्बम् । मुनीनां कवीनां हृदि द्योतयन्तं स्वरूपं त्वदीयं न विन्दन्ति देवा:॥८॥ महामेघकाली सुरक्तापि शुभ्रा कदाचिद् विचित्राकृतिर्योगमाया । न बाला न वृद्धा न कामातुरापि स्वरूपं त्वदीयं न विन्दन्ति देवा: ॥९॥ क्षमस्वापराधं

22

महागुप्तभावं मया लोकमध्ये प्रकाशीकृत यत् । तव ध्यानपूतेन चापल्यभावात् स्वरूपं त्वदीयं न विन्दन्ति देवा: ॥१०॥ फलश्रुति: यदि ध्यानयुक्तं पठेद् यो मनुष्य-स्तदा सर्वलोके विशालो भवेच्च । गृह चाष्टसिद्धिर्मृते चापि मुक्ति: स्वरूपं त्वदीयं न विन्दन्ति देवा: ॥११॥ ॥ इति श्रीमच्छङ्कराचार्यविरचितं श्रीकालिकाष्टकं सम्पूर्णम् ॥

श्री तारा शतनामावली स्तोत्रम
!! श्रीशिव उवाच ॥ तारिणी तरला तन्वी तारा तरुणवल्लरी । तीररूपा तरी श्यामा तनुक्षीणपयोधरा ॥ १॥ तुरीया तरला तीव्रगमना नीलवाहिनी । उग्रतारा जया चण्डी श्रीमदेकजटाशिराः ॥ २॥ तरुणी शाम्भवीछिन्नभाला च भद्रतारिणी । उग्रा चोग्रप्रभा नीला कृष्णा नीलसरस्वती ॥ ३॥ द्वितीया शोभना नित्या नवीना नित्यनूतना । चण्डिका विजयाराध्या देवी गगनवाहिनी ॥ ४॥ अट्टहास्या करालास्या चरास्या दितिपूजिता । सगुणा सगुणाराध्या हरीन्द्रदेवपूजिता ॥ ५॥ रक्तप्रिया च रक्ताक्षी रुधिरास्यविभूषिता । बलिप्रिया बलिरता दुर्गा
बलवती बला ॥ ६॥ बलप्रिया बलरता बलरामप्रपूजिता ।
अर्धकेशेश्वरी केशा केशवासविभूषिता ॥ ७॥
पद्ममाला च पद्माक्षी कामाख्या गिरिनन्दिनी ।
दक्षिणा चैव दक्षा च दक्षजा दक्षिणे रता ॥ ८॥
वज्रपुष्पप्रिया रक्तप्रिया कुसुमभूषिता ।
माहेश्वरी महादेवप्रिया पञ्चविभूषिता ॥ ९ ॥ इडा च पिङ्गला चैव सुषुम्ना प्राणरूपिणी । गान्धारी
पञ्चमी पञ्चाननादि परिपूजिता ॥ १०॥ तथ्यविद्या
तथ्यरूपा तथ्यमार्गानुसारिणी । तत्त्वप्रिया तत्त्वरूपा तत्त्वज्ञानात्मिकाऽनघा ॥ ११॥

23

ताण्डवाचारसन्तुष्टा ताण्डवप्रियकारिणी ।
तालदानरता क्रूरतापिनी तरणिप्रभा ॥ १२॥
त्रपायुक्ता त्रपामुक्ता तर्पिता तृप्तिकारिणी
। तारुण्यभावसन्तुष्टा शक्तिर्भक्तानुरागिणी ॥
१३॥ शिवासक्ता शिवरतिः शिवभक्तिपरायणा ।
ताम्रद्युतिस्ताम्ररागा ताम्रपात्रप्रभोजिनी ॥
१४॥ बलभद्रप्रेमरता बलिभुग्बलिकल्पिनी ।
रामरूपा रामशक्ती रामरूपानुकारिणी ॥ १५॥
इत्येतत्कथितं देवि रहस्यं परमाद्भुतम् ।
श्रुत्वा मोक्षमवाप्नोति तारादेव्याः प्रसादतः
॥ १६॥ य इदं पठति स्तोत्रं तारास्तुतिरहस्यकम् ।
सर्वसिद्धियुतो भूत्वा विहरेत् क्षितिमण्डले ॥
१७॥ तस्यैव मन्त्रसिद्धिः स्यान्ममसिद्धिरनुत्तमा । भवत्येव महामाये
सत्यं सत्यं न संशयः ॥ १८॥ मन्दे मङ्गलवारे च यः
पठेन्निशि संयतः । तस्यैव
मन्त्रसिद्धिस्स्याद्गाणपत्यं लभेत सः ॥ १९॥
श्रद्धयाऽश्रद्धया वापि पठेत्तारारहस्यकम् ।
सोऽचिरेणैव कालेन जीवन्मुक्तः शिवो भवेत् ॥ २०॥
सहस्रावर्तनाद्देवि पुरश्चर्याफलं लभेत् । एवं
सततयुक्ता ये ध्यायन्तस्त्वामुपासते । ते
कृतार्था महेशानि मृत्युसंसारवर्त्मनः ॥ २१॥
इति स्वर्णमालातन्त्रे ताराशतनामस्तोत्रं
समाप्तम् ॥

श्री दुर्गा सप्तशति बीजमंत्रात्मक साधना
ओम श्री गणेशाय
ओम ह्रुं जुं सः सिद्ध गुरूवे नमः
ओम दुर्गे दुर्गे रक्षीणी ठः ठः स्वाहः सिद्धकुञ्जिकास्तोत्रम
ओम ऐं ह्रीं क्लीं चामण्डायै विच्चे | ओम ग्लौं

24

हुं क्लीं जूं सः
ज्वालय ज्वालय ज्वल ज्वल प्रज्वल प्रज्वल
ऐं ह्रीं क्लीं चामुण्डायै विच्चै
ज्वल हं सं लं क्षं फट् स्वाहा ||
नमस्ते रुद्ररूपिण्यै नमस्ते मधुमर्दीनि | नमः
कैटभहारिण्यै नमस्ते महिषार्दीनि ||
नमस्ते शुम्भहन्त्र्यै च निशुम्भसुरघातिनि |
जाग्रतं हि महादेवि जपं सिद्धं कुरुष्व मे ||
ऐंकारी सृष्टीरूपायै ह्रींकारी प्रतिपालिका |
क्लींकारी कामरूपिण्यै बीजरूपे नमोस्तुते ||
चामुण्डा चण्डघाती च यैकारी वरदायिनी | विच्चे
चाभयदा नित्यं नमस्ते मन्त्ररूपिणि ||
धां धीं धूं धूर्जटेः पत्नी वां वीं वूं
वागधीश्वरी | क्रां क्रीं क्रूं कालिका देवि शां
शीं शूं मे शुंभ कुरू ||
हुं हुं हुं हुंकाररूपिण्यै जं जं जं जम्भनादिनी
| भ्रां भ्रीं भ्रूं भैरवी भद्रै भवान्यै ते नमो
नमः ||
अं कं चं टं तं पं यं शं वीं दुं ऐं वीं हं क्षं |
धिजाग्रं धिजाग्रं त्रोटय त्रोटय दीप्तं कुरु
कुरु स्वाहा ||
पां पीं पूं पार्वती पूर्णा खां खीं खूं खेचरी
तथा | सां सीं सूं सप्तशती देव्या मन्त्रसिद्धिं
कुरुष्व मे ||
ओम नमश्चण्डिकायैः|ओम श्री दुर्गार्पणमस्तु||
प्रथमचरित्र
ओम अस्य श्री प्रथमचरित्रस्य ब्रह्मा रूषिः महाकाली देवता गायत्री छन्दः नन्दा शक्तिः रक्तदन्तिका बीजम् अग्निस्तत्त्वम् रूग्वेद स्वरूपम् श्रीमहाकाली प्रीत्यर्थे प्रथमचरित्र जपे विनियोगः|
(१) श्रीं ह्रीं क्लीं श्रीं प्रीं ह्रां ह्रीं

25

सौं प्रें म्रें ल्ह्रीं म्लीं स्त्रीं क्रां स्ल्हीं क्रीं चां भें क्रीं वैं ह्रौं युं जुं हं शं रौं यं विं वैं चें ह्रीं क्रं सं कं श्रीं त्रों स्त्रां ज्यैं रौं द्रां द्रों ह्रां द्रूं शां म्रीं श्रौं जूं ल्ह्रूं श्रूं प्रीं रं वं व्रीं ब्लूं स्त्रौं ब्लां लूं सां रौं हसौं क्रूं शौं श्रौं वं त्रूं क्रौं क्लूं क्लीं श्रीं व्लूं ठां ठ्रीं स्त्रां स्लूं क्रैं च्रां फ्रां जीं लूं स्लूं नों स्त्रीं प्रूं स्त्रूं ज्रां वौं ओं श्रौं रीं रूं क्लीं दुं ह्रीं गूं लां ह्रां गं ऐं श्रौं जूं डें श्रौं छ्रां क्लीं
|ओम श्री दुर्गार्पणमस्तु|
मध्यमचरित्र
ओम अस्य श्री मध्यमचरित्रस्य विष्णुर्रूषिः महालक्ष्मीर्देवता उष्णिक छन्दः शाकम्भरी शक्तिः दुर्गा बीजम् वायुस्तत्त्वम् यजुर्वेदः स्वरूपम् श्रीमहालक्ष्मी प्रीत्यर्थे मध्यमचरित्र जपे विनियोगः
(२) श्रौं श्रीं ह्सूं हौं ह्रीं अं क्लीं चां मुं डां यैं विं च्चें ईं सौं व्रां त्रौं लूं वं ह्रां क्रीं सौं यं ऐं मूं सः हं सं सों शं हं ह्रौं म्लीं यूं त्रूं स्त्रीं आं प्रें शं ह्रां स्मूं ऊं गूं व्र्यूं ह्रूं भैं ह्रां क्रूं मूं ल्ह्रीं श्रां द्रूं द्व्रूं ह्सौं क्रां स्हौं म्लूं श्रीं गैं क्रूं त्रीं क्ष्फीं क्सीं फ्रों ह्रीं शां क्ष्म्रीं रों डुं•
|ओम श्री दुर्गार्पणमस्तु|
(३) श्रौं क्लीं सां त्रों प्रूं ग्लौं क्रौं व्रीं स्लीं ह्रीं हौं श्रां ग्रीं क्रूं क्रीं यां द्लूं द्रूं क्षं ह्रीं क्रौं क्ष्म्ल्रीं वां श्रूं ग्लूं ल्रीं प्रें हूं ह्रौं दें नूं

26

आं फ्रां प्रीं दं फ्रीं ह्रीं गूं श्रौं सां श्रीं जुं हं सं
|ओम श्री दुर्गार्पणमस्तु|
(४) श्रौं सौं दीं प्रें यां रूं भं सूं श्रां औं लूं डूं जूं धूं त्रें ल्हीं श्रीं ईं ह्रां ल्ह्रूं क्लूं क्रां लूं फ्रें क्रीं म्लूं घ्रें श्रौं ह्रौं व्रीं ह्रीं त्रौं हलौं गीं यूं ल्हीं ल्हूं श्रौं ओं अं म्हौं प्रीं
|ओम श्री दुर्गार्पणमस्तु|
उत्तमचरित्र
ओम अस्य श्री उत्तरचरित्रस्य रुद्र रूषिः महासरस्वती देवता अनुष्टुप् छन्दः भीमा शक्तिः भ्रामरी बीजम सूर्यस्तत्त्वम सामवेदः स्वरूपम श्री महासरस्वती प्रीत्यर्थे उत्तरचरित्र जपे विनियोगः
(५) श्रौं प्रीं ओं ह्रीं ल्रीं त्रों क्रीं ह्लौं ह्रीं श्रीं हूं क्लीं रौं स्त्रीं म्लीं प्लूं ह्सौं स्त्रीं ग्लूं व्रीं सौः लूं ल्लूं द्रां क्सां क्ष्म्रीं ग्लौं स्कं त्रूं स्क्लूं क्रौं च्छ्रीं म्लूं क्लूं शां ल्हीं स्त्रूं ल्लीं लीं सं लूं हस्त्रूं श्रूं जूं हस्ल्रीं स्कीं क्लां श्रूं हं ह्लीं क्स्त्रूं द्रौं क्लूं गां सं ल्स्त्रां फ्रीं स्लां ल्लूं फ्रें ओं स्म्लीं ह्रां ऊं ल्हूं हूं नं स्त्रां वं मं म्क्लीं शां लं भैं ल्लूं हौं ईं चें क्ल्रीं ल्ह्रीं क्ष्म्ल्रीं पूं श्रौं ह्रौं भ्रूं क्स्त्रीं आं क्रूं त्रूं डूं जां ल्ह्रूं फ्रौं क्रौं किं ग्लूं छ्रंक्लीं रं क्सैं स्हुं श्रौं श्रीं ओं लूं ल्हूं ल्लूं स्क्रीं स्स्त्रौं स्भ्रूं क्ष्मक्लीं व्रीं सीं भूं लां श्रौं स्हैं ह्रीं श्रीं फ्रें रूं च्छ्रूं ल्हूं कं द्रें श्रीं सां ह्रौं ऐं स्कीं

27

|□□ □□□□ □□□□□□□□□□□□□□□□|
(□) □□□□□ □□ □□□□□ □□□□□ □□□□□ □□□□□ □□□□□ □□□□□ □□□□□ □□□□□ □□□□□ □□□□□ □□□□ □□□□ □□□□□ □□□□□ □□□ □□□□□ □□□□□□□□□□□□ □□□□□ □□□ □□□□□ □□□□□ □□□

|□□ □□□□ □□□□□□□□□□□□□□□□|
(□) □□□□□ □□□ □□□□□ □□□□ □□□ □□□□□ □□□□□ □□ □□□□□ □□□□□ □□□□□ □□□ □□□ □□□□□□□ □□□□□ □□□ □□□□□ □□□□□ □□□□□ □□ □□ □□□□□□□ □□□□□ □□□ □□□□□ □□□□□ □□□□□□□□

|□□ □□□□ □□□□□□□□□□□□□□□□|
(□) □□□□□ □□□□□□□□ □□□□□ □□ □□□□□ □□ □□ □□□□□ □□□□□ □□□□□ □□□ □□□ □□□□□ □□□□□ □□□□□ □□□ □□□□□ □□□□□ □□□□□□□□□ □□□□□ □□□□□ □□□ □□□ □□□□□ □□□□□□□□□□ □□□□□ □□□□□□□ □□□□□ □□□□□ □□□ □□□□□ □□□□□ □□□□□ □□□□□ □□□ □□□□□ □□ □□□□□ □□ □□□□□ □□□□□□□ □□□ □□□□□ □□□□□ □□□□□ □□□□□ □□□□□ □□□□□ □□□□□□□ □□□ □□□□□ □□□□□ □□□□□ □□□□□ □□□□□□□□□□ □□□□□□□ □□□□□□□□□□

|□□ □□□□ □□□□□□□□□□□□□□□□|
